ॐस्वस्ति ॥ श्रीगणेशाय नमः ॥ अथकात्यायनीयशांतिप्रयोगः ॥ आदौगणपतिंवन्देविघ्ननाशंविनायकम् ॥ ऋषींश्चदेवजननींग्रहस्थापनमारभे ॥ १ ॥ मण्डलंचततःकृत्वासर्वतोभद्रमेवच ॥ व्रतोपनयनेचूडायाञ्चशांतिरुदाहृता ॥ २ ॥ विवाहादौलिखेन्नित्यंतिलकंनाममंडलम् ॥ द्वादशांगुलमध्यस्थंवर्तुलाष्टदलंरविं ॥ ३ ॥ चन्द्रमर्द्धंलिखेत्तत्राग्नेय्यांचतुर्विंशतिः ॥ त्रिकूटंभूसुतंचैवदक्षिणेचतुरंगुलम् ॥ ४ ॥ धनुराकारंनवांगुल्यमीशानेचबुधंतथा ॥ उत्तरेचगुरुःस्थाप्यःपद्माकारोनवांगुलः ॥ ५ ॥ पूर्वेसंस्थापयेच्छुक्रंचतुष्कोणंनवांगुलं ॥ खड्गाकृतिंनवांगुल्यंप्रतीच्यांशनिमेवच ॥ ६ ॥ संस्थाप्यराहुंनैर्ऋत्यांमत्स्याकारंनवांगुलम् ॥ केतुंदीर्घंयथाराहुंवायव्यांदिशिसंस्थितम् ॥ ७ ॥ स्वस्वदिक्षुग्रहाःस्थाप्याःसख्यारे

खाभवेद्ध्रुवम्॥भास्करांगारकौरक्तौश्वेतौशुक्रनिशाकरौ ॥ ८ ॥ शां०
सोमपुत्रोगुरुश्चैवचोभौतौपीतकौस्मृतौ॥कृष्णवर्णोभवेत्सौरीरा
हुकेतूचधूम्रकौ ॥ ९ ॥ ब्रह्माविष्णुश्चरुद्रश्चह्युत्तरेचतथाऽनलः ॥
इंद्रोवायुर्भवेत्पूर्वेसर्पकालौचदक्षिणे ॥ १० ॥ ऐशान्यांकलशं
स्थाप्य ॐकारादींश्चसर्वतः ॥ मातरश्चोत्तरेस्थाप्याह्याग्नेय्यां
योगिनींन्यसेत् ॥ ११ ॥ कनिष्ठिकाप्रमाणेनरेखाःकार्य्याः
प्रयत्नतः ॥ शूलाःसूक्ष्मानकर्तव्यायदीच्छेच्छ्रेयआत्मनः ॥
॥ १२ ॥ इतिग्रहस्थापनविधानम् ॥ अथ स्वस्तिवाचनम् ॥
ॐस्वस्तिनइन्द्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्ति २
नस्तार्क्ष्योअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु ॥ पयःपृथि
व्यांपयओषधीषुपयोदिव्यंतरिक्षेपयोधाःपयस्वतीः प्रदिशःसं

तुमह्यम् ॥ विष्णोरराटमसि विष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसि
विष्णोर्ध्रुवोसि वैष्णवमसिविष्णवेत्वा।अग्निर्देवतावातोदेवतासू
र्य्यो देवता चंद्रमा देवता वसवोदेवतारुद्रादेवताआदित्यादेवता
मरुतोदेवता विश्वेदेवादेवता बृहस्पतिर्देवतेंद्रोदेवतावरुणोदेवता
द्यौःशांतिरंतरिक्षꣳशांतिःपृथिवीशांतिरापःशांतिरोषधयःशांति
र्विश्वेदेवाःशांतिर्ब्रह्मशांतिःसर्वꣳशांतिःशान्तिरेवशांतिः सामा
शांतिरेधि॥सुशांतिर्भवतु॥विश्वानिदेवसवितर्दुरितानिपरासुव॥
यद्भद्रंतन्नआसुव ॥ इमारुद्रायतमसेकपर्दिनेक्षयद्वीरायप्रभराम
हेतीः॥यथाशमसद्द्विपदेचतुष्पदेविश्वंपुष्टंग्रामेअस्मिन्ननातुरम्॥
एतंतेदेवसवितर्यज्ञंप्राहुर्बृहस्पतयेब्रह्मणेतेन यज्ञमवतेनयज्ञपतिं
तेनमामव ॥ मनोजूतिर्जुषतामाज्यस्यबृहस्पतिर्यज्ञमिमंतनो

का० त्वरिष्टं यज्ञ ँ समिमंदधातु ॥ विश्वेदेवासइहमादयंतामोंप्रति शां०
३ ष्ठ ॥ एषवैप्रतिष्ठानामयज्ञोयत्रैतेनयज्ञेनयजंतेसर्वमेवप्रतिष्ठितं
भवति ॥ ॐगणनांत्वा गणपति ँ हवामहे प्रियाणांत्वाप्रिय
पति ँ हवामहे निधीनांत्वानिधिपति ँ हवामहे वसोमम ॥
आहमजानिगर्भधमात्वमजासिगर्भधम् ॥ नमोगणेभ्योगणप
तिभ्यश्च वोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमोनमोगृत्से
भ्योगृत्सपतिभ्यश्चवोनमोनमोविरूपेभ्यो विश्वरूपेभ्यश्चवोन
मः॥ॐसुमुखश्चैकदंतश्च कपिलोगजकर्णकः॥लम्बोदरश्चवि
कटोविघ्ननाशोगणाधिपः॥धूम्रकेतुर्गणाध्यक्षोभालचंद्रोगजान ३
नः॥द्वादशैतानिनामानियःपठेच्छृणुयादपि॥विद्यारंभेविवाहे
चप्रवेशेनिर्गमेतथा॥संग्रामेसंकटेचैवविघ्नस्तस्यनजायते॥शु

क्लांबरधरंदेवंशुक्लवर्णं चतुर्भुजम् ॥ प्रसन्नवदनंध्यायेत्सर्वविघ्नो
पशान्तये॥अभीप्सितार्थसिद्ध्यर्थंपूजितोयःसुरासुरैः॥सर्वविघ्न
हरस्तस्मैगणाधिपतयेनमः ॥ ततःसंकल्पः॥ॐतत्सदद्यब्रह्मणो
द्वितीयेपरार्द्धेश्रीश्वेतवाराहकल्पेजंबूद्वीपेभरतवर्षेआर्यावर्ते अद्य
वर्तमानेअष्टाविंशतितमेकलियुगेप्रथमचरणेवैवस्वतमन्वंतरेऽ
मुकऋतौअमुकमासेऽमुकपक्षेऽमुकतिथौ अमुकवासरे अमुक
करणे अमुकनक्षत्रेअमुकयोगेएवंगुणविशेषणविशिष्टायांपुण्य
तिथौममात्मनःश्रुतिस्मृतिपुराणोक्तफलावाप्तिकामस्यधर्मार्थ
काममोक्षार्थमनोभिलषिताप्तये अमुकगोत्रोऽमुकशर्माहममुक
कर्मनिमित्तंकात्यायनोक्तांशांतिंकरिष्ये॥तन्निर्विघ्नपरिसमाप्तये
गणपतिपूजनंचकरिष्ये इतिसंकल्प्य गणपतिंपूजयेत्॥ ॐ गणा

नांत्वागणपतिꣳहवामहे०इतिमंत्रेणॐभूर्भुवःस्वःभोऋद्धिबुद्धि सहितगणपतिदैवतइहागच्छइहतिष्ठसुप्रतिष्ठितोवरदोभवममपूजांगृहाण॥इत्यावाह्यपाद्यादिभिरर्चयेत्॥भोऋद्धिबुद्धिसहितगणपतिदैवतएतत्पाद्यं गृहाण सुप्रसन्नोवरदोभव ॥ एवमेवअर्घ्याचमनस्नानवस्त्रगंधपुष्पधूपदीपनैवेद्यफलतांबूलदक्षिणाभिरभ्यर्च्यमंत्रपुष्पं समर्प्य प्रार्थयेत् ॥ वक्रतुंडमहाकायसूर्यकोटिसमप्रभ ॥ निर्विघ्नंकुरुमेदेवसर्वकार्येषुसर्वदा ॥ इति ॥ अथपंचोपचारपूजनम् ॥आवाहयाम्यहंदेवमोंकारंपरमेश्वरम्॥ त्रिमात्रंत्र्यक्षरंदिव्यंत्रिपदं चत्रिदैवतम् ॥ त्र्यक्षरंत्रिगुणाकारंसर्वाक्षरमयंशुभम् ॥ त्र्यर्णवंप्रणवंहंसंस्त्रष्टारंपरमेश्वरम् ॥ अनादिनिधनंदेवमप्रमेयंसनातनम् ॥ परात्परतरंबीजंनिर्मलंनिष्कलंशुभम् ॥

ॐ आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसीजायतामाराष्ट्रेराजन्यः शूरइष
व्योतिव्याधीमहारथोजायताम् ॥ दोग्ध्रीधेनुर्वोढानराना शुः
सप्तिः पुरंधिर्योषाजिष्णूरथेष्ठाः ॥ सभेयो युवास्ययजमानस्य
वीरोजायतांनिकामेनिकामेनः पर्जन्योवर्षतुफलवत्योनओष
धयः पच्यंतांयोगक्षेमोनः कल्पताम् ॥ अथरक्षाविधानम् ॥
ॐ मानः शꣳसोअररुषोधूर्तिः प्रणङ्मर्त्यस्यरक्षाणो ब्रह्मणस्प
ते ॥ ॐ यदाबध्नन्दाक्षयणाहिरण्य ꣳशतानीकाय सुमनस्य
मानाः ॥ तन्मआबध्नामिशतशारदायाऽऽयुष्मान्जरदष्टिर्य
थासमितिपठेत् ॥ अथमातृपूजनम् ॥ गौरीपद्माशचीमेधासा
वित्रीविजयाजया ॥ देवसेनास्वधास्वाहामातरोलोकमातरः ॥
हृष्टिः पुष्टिस्तस्थातुष्टिस्तथात्मकुलदेवता ॥ ब्राह्मीमाहेश्वरीचै

वकौमारीवैष्णवीतथा ॥ वाराहीच तथैंद्राणीचामुंडासप्तमात
रः ॥ कुलदेव्यन्तगौर्यादिषोडशमातृभ्योनमः ब्राह्म्यादिसप्तमा
तृभ्योनमः ॥ इतिनाममंत्रेणषोडशोपचारैः संपूज्यऋत्विजोवृ
णुयात्॥ अथऋत्विजांवरणम् ॥ यथाचतुर्मुखोब्रह्मासर्ववेदधरः
प्रभुः ॥ तथात्वंममयज्ञेस्मिन्ब्रह्माभवद्विजोत्तम ॥ गृहीत्वातुकरां
गुष्ठं यजमानः पठेदिदम्॥ अस्यकर्मणः प्रतिष्ठापनार्थंत्वंब्रह्माभव
इतियजमानोवदेत् ॥ अहंभवामि॥ इतिब्राह्मणोवदेत्॥ आचार्य
स्तुयथास्वर्गेशक्रादीनांबृहस्पतिः ॥ तथात्वंममयज्ञेस्मिन्नाचा
र्योभवसुव्रत॥ गृहीत्वातुकरांगुष्ठंयजमानः पठेदिदम्॥ अस्यकर्म
णः प्रतिष्ठापनार्थंत्वमाचार्योभव॥ इतियजमानोवदेत्॥ अहंभ
वामि॥ इतिब्राह्मणोवदेत् ॥ ऋग्वेदः पद्मपत्राक्षोगायत्रः सोमदैव

तः ॥ अत्रिगोत्रस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभव ॥ गृहीत्वातुकरांगुष्ठंयजमानः पठेदिदम् ॥ अस्यकर्मणः ॥ प्रतिष्ठापनार्थंत्वमस्मिन्यज्ञकर्मणिऋग्वेदीभव इतियजमानः ॥ अहंभवामि इति ब्राह्मणः॥ कातराक्षोयजुर्वेदस्त्रैष्टुभोब्रह्मदैवतः ॥ भारद्वाजस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभव ॥ गृहीत्वातुकरांगुष्ठंयजमानः पठेदिदम् ॥ अस्यकर्मणःप्रतिष्ठापनार्थं त्वमस्मिन्यज्ञकर्मणियजुर्वेदी भव ॥ इतियजमानः ॥ अहं भवामि इति ब्राह्मणः ॥ सामवेदस्तुपिंगाक्षस्त्रैष्टुभोविष्णुदैवतः॥ काश्यपेयस्तु विप्रेंद्रऋत्विक्त्वंमेमखेभव ॥ गृहीत्वातुकरांगुष्ठंयजमानःपठेदिदम् ॥ अस्यकर्मणः प्रतिष्ठापनार्थंत्वमस्मिन्यज्ञकर्मणिसामवेदीभव इतियजमानः ॥ अहंभवामि इतिब्राह्मणः ॥ बृहन्नेत्रोथर्ववेदोनुष्टु

भोरुद्रदैवतः॥वैखानसोत्रविप्रेंद्रऋत्विक्त्वंमेमखेभव॥ गृहीत्वा
तुकरांगुष्ठंयजमानःपठेदिदम् ॥ अस्यकर्मणःप्रतिष्ठापनार्थंत्वम
स्मिन्यज्ञकर्मणि अथर्ववेदीभव ॥ इतियजमानः॥ अहंभवामि
इतिब्राह्मणः॥ अथाशीर्वादः ॥ ऋग्वेदस्तुयजुर्वेदःसामवेदोह्यथ
र्वणः ॥ ब्रह्मवाक्यैश्चतैर्नित्यंहन्यंतांतवशत्रवः॥ अपुत्राःपुत्रिणः
संतुपुत्रिणःसंतुपौत्रिणः ॥ अधनाःसधनाःसन्तुसंतुसर्वार्थसा
धकाः॥ विप्रहस्ताच्चगृह्णीयाद्यज्ञपुष्पफलाक्षतान् ॥ चत्वारस्त
ववर्द्धतामायुःकीर्तिर्यशोबलम्॥ अथकलशपूजनम्॥ऋग्वेदाय
नमः॥यजुर्वेदायनमः॥सामवेदायनमः॥ अथर्ववेदायनमः॥क
लशायनमः॥रुद्रायनमः॥वरुणायनमः ॥ समुद्रायनमः॥गंगा
यैनमः ॥ यमुनायैनमः॥सरस्वत्यैनमः ॥ कलशकुंभायनमः॥

ब्रह्मणानिर्मितस्त्वंहिमंत्रैरेवामृतोद्भवः॥ प्रार्थयामिचत्वांकुंभंवां
छितार्थंप्रदेहिमे॥ ॐवरुणस्योत्तंभनमसिवरुणस्यस्कंभसर्ज्जनी
स्थोवरुणस्यऋतसदन्यसिवरुणस्यऋतसदनमसिवरुणस्यऋ
तसदनमासीद॥ अंजलिंकृत्वाकलशंस्पृशेत्॥कलशस्यमुखेवि
ष्णुःकंठेरुद्रःसमाश्रितः॥मूलेतत्रस्थितोब्रह्मामध्येमातृगणाःस्मृ
ताः॥कुक्षौतुसागराःसप्तसप्तद्वीपावसुन्धरा॥ ऋग्वेदोऽथयजुर्वे
दःसामवेदोह्यथर्वणः॥अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताः॥
अत्रगायत्रीसावित्रीशांतिःपुष्टिकरीतथा॥आयान्तुममशांत्यर्थं
दुरितक्षयकारकाः॥ सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः॥
आयांतुममशांत्यर्थंदुरितक्षयकारकाः॥इतिसंप्रार्थयेत्॥अथवा
स्तुपूजा॥ अथातः संप्रवक्ष्यामियदुक्तंवास्तुपूजनम्॥येनपूजा

विधानेनकर्मसिद्धिस्तुजायते ॥ अनंतंपुंडरीकाक्षंफणाशतविभू
षितम् ॥ विद्युद्धन्धूकसाकारंकूर्मारूढंप्रपूजयेत् ॥ ॐनमोस्तुसर्पे
भ्योयेकेचपृथिवीमनु ॥ येअंतरिक्षेयेदिवितेभ्यःसर्पेभ्योनमः ॥
वासुक्याद्यष्टकुलनागेभ्योनमः ॥ अथयोगिनीपूजा ॥ ॐआवा
हयाम्यहंदेवींयोगिनींपरमेश्वरीम् ॥ योगाभ्यासेनसंतुष्टापरंध्या
नसमन्विता ॥ दिव्यकुण्डलसंकाशादिव्यज्वालात्रिलोचना ॥
मूर्तिमतीह्यमूर्ताचउग्राचैवोग्ररूपिणी ॥ अनेकभावसंयुक्तासंसा
रार्णवतारिणी ॥ यज्ञंकुर्वन्तुनिर्विघ्नंश्रेयोयच्छंतुमातरः ॥ दिव्य
योगीमहायोगीसिद्धयोगीगणेश्वरी ॥ प्रेताशीडाकिनीकालीका
लरात्रीनिशाचरी ॥ हुंकारीसिद्धवेतालीखर्परीभूतगामिनी ॥ ऊ
र्ध्वकेशीविरूपाक्षीशुष्कांगीमांसभोजिनी ॥ फूत्कारीवीरभद्राक्षी

धूम्राक्षीकलहप्रिया॥रक्ताचघोररक्ताक्षीविरूपाक्षीभयंकरी॥ चौरिकामारिकाचण्डीवाराहीमुण्डधारिणी॥भैरवीचक्रिणीक्रोधादुर्मुखीप्रेतवासिनी॥ कालाक्षीमोहिनीचक्रीकंकालीभुवनेश्वरी ॥ कुण्डलातालकौमारीयमदूतीकरालिनी ॥ कौशिकीयक्षिणीयक्षीकौमारीयंत्रवाहिनी ॥ दुर्घटेविकटेघोरेकपालेविषलंघने ॥ चतुःषष्टिःसमाख्यातायोगिन्योहिवरप्रदाः ॥ त्रैलोक्येपूजितानित्यंदेवमानुषयोगिभिः ॥ इति ॥ अथब्रह्मपूजा ॥ ॐब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः ॥ सबुध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः ॥ ब्रह्मणेनमः ॥ इतिपाद्यादिभिर्ब्रह्माणमभ्यर्चयेत् ॥ अथविष्णुपूजा ॥ ॐविष्णोरराटमसिविष्णोः श्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रु

वोसिवैष्णवमसिविष्णवेत्वा ॥ विष्णवेनमः॥ इतिविष्णुंपाद्या
दिभिरभ्यर्चयेत् ॥ अथशिवपूजा ॥ ॐनमःशंभवायचमयो
भवायचनमःशंकरायचमयस्करायचनमः शिवायचशिवतरा
यच ॥ शिवायनमः ॥ इतिशिवंपाद्यादिभिरभ्यर्चयेत् ॥ अथें
द्रपूजा॥ॐत्रातारमिंद्रमवितारमिंद्रꣳ हवेहवेसुहवꣳशूरमिंद्रम् ॥
ह्वयामिशक्रंपुरुहूतमिंद्रꣳस्वस्तिनोमघवाधात्विंद्रः ॥ ॐइंद्राय
नमः॥इतिपाद्यादिभिःपूजयेत् ॥ अथवायुपूजा ॥ ॐवायोयेते
सहस्रिणोरथासस्तेभिरागहि ॥ नियुत्वान्सोमपीतये॥ॐवातो
वामनोवातो गंधर्वाःसप्तविꣳशतिः॥ तेअग्रेऽश्वमयुजंस्तेऽस्मिन्न
वमादधुः॥ ॐवायवेनमः॥इतिपाद्यादिभिःपूजयेत्॥ अथधर्मपू
जा॥ॐअग्नेसपत्नदंभनमदब्धासोऽअदाभ्यम् ॥ चित्रावसोस्व

स्तितेपारमशीय। ॐधर्मायनमः।इतिपाद्यादिभिःपूजयेत्॥अथ
यमपूजा।ॐअसियमोअस्यादित्योअर्वन्नसित्रितोगृह्येनव्रतेन॥
असिसोमेनसमयाविपृक्तआहुस्तेत्रीणिदिविबंधनानि॥ यमाय
नमः॥ इतियमपूजादक्षिणे कार्या॥ अथनवग्रहपूजा॥ ॐआ
कृष्णेरजसावर्त्तमानोनिवेशयन्नमृतंमर्त्यंच ॥ हिरण्ययेनसवि
तारथेनादेवोयातिभुवनानिपश्यन्॥ ॐसूर्य्यायनमः॥इतिसूर्यं
पूजयेत्॥ॐइमंदेवाअसपत्नꣳसुवध्वंमहतेक्षत्रायमहतेज्यैष्ठ्या
यमहतेज्यानराज्यायेंद्रस्येन्द्रियाय॥ इमममुष्यपुत्रममुष्यै पुत्र
मस्यैविशएषवोमीराजासोमोस्माकंब्राह्मणानाꣳराजा॥ ॐसो
मायनमः॥ ॐअग्निर्मूर्द्धादिवःककुत्पतिःपृथिव्याअयम्॥ अपा
ꣳरेता सिजिन्वति॥ ॐभौमायनमः॥ ॐउद्बुध्यस्वाग्नेप्रति

का० जागृहित्वमिष्टापूर्तेसꣳसृजेथामयंच ॥ अस्मिन्सधस्थेअध्युत्त शां०
१ रस्मिन्विश्वेदेवायजमानश्चसीदत॥ ॐबुधायनमः॥ ॐबृहस्पते
अतियदर्योअर्हाद्युमद्विभातिक्रतुमज्जनेषु॥यद्दीदयच्छवसऋतप्र
जाततदस्मासुद्रविणंधेहिचित्रम्॥ ॐबृहस्पतयेनमः॥ ॐअन्ना
त्परिस्रुतोरसंब्रह्मणाव्यपिबत्क्षत्रंपयःसोमंप्रजापतिः॥ ऋतेनस
त्यमिंद्रियंविपानꣳशुक्रमंधसइंद्रस्येंद्रियमिदंपयोमृतंमधु॥ॐ
शुक्रायनमः॥ ॐशन्नोदेवीरभिष्टय आपोभवंतुपीतये॥ शंयोर
भिस्रवंतुनः॥ ॐशनैश्चरायनमः॥ ॐकयानश्चित्रआभुवदूती
सदावृधःसखा॥ कयाशचिष्ठयावृता॥ ॐ राहवे नमः॥ ॐ १
केतुंकृण्वन्नकेतवेपेशोमर्याअपेशसे॥ समुषद्भिरजायथाः॥ ॐ
केतवेनमः॥ ॐ ब्रह्मामुरारिस्त्रिपुरांतकारीभानुः शशी भूमिसु

तोबुधश्च ॥ गुरुश्चशुक्रः शनिराहुकेतवः सर्वेग्रहाः शान्तिकराभ
वंतु॥इतिनवग्रहपूजा ॥ ॐ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनम्॥
उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् ॥ इतित्र्यंबकपूजा॥
अथकुशकण्डिकारंभः ॥ ततोहोमार्थंचतुरंगुलोच्छ्रितांहस्तमा
त्रपरिमितांवेदींकुर्यात् ॥ कुशैःपरिसमूह्यतान्कुशानैशान्यांपरि
त्यज्यगोमयोदकेनोपलिप्यखादिरेणस्रुवेणचोल्लेखनं हस्तेनोद्ध
रणंजलेनाभ्युक्षणं कांस्यपात्रयुगलेनलौकिकंनिर्मथितंवाग्निमा
नीयस्थापयेत् ॥ ततःपुष्पचंदनतांबूलवासांस्यादाय ॥ ॐ अ
द्यकर्त्तव्यामुकशांतिहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मकर्तु
ममुकगोत्रममुकशर्माणमेभिःपुष्पचंदनतांबूलवासोभिर्ब्रह्मत्वेन
त्वामहंवृणे॥इतिब्राह्मणंवृणुयात्॥ॐवृतोस्मीतिप्रतिवचनम् ॥

का० यथाविहितंकर्मकुरुइतिआचार्येणोक्तेकरवाणीतिप्रतिवचनम्॥ शां०
१० ततोग्नेर्दक्षिणतः शुद्धमासनंदत्त्वातदुपरिप्रागग्रान्कुशानास्ती
र्य्यअग्निंप्रदक्षिणंकारयित्वास्मिन्कर्मणित्वंमेब्रह्माभवेत्यभिधा
यभवानीतितेनोक्तेतदुपरिब्रह्माणमुदङ्मुखमुपवेश्यप्रणीतापात्रं
पुरतःकृत्वावारिणापरिपूर्य्यआच्छाद्यब्रह्मणोमुखमवलोक्याग्नेरु
त्तरतः॥ कुशोपरिनिदध्यात् ॥ ततःपरिस्तरणंबर्हिषश्चचतुर्थ
भागमादायाग्नेयादीशानांतम्॥ ब्रह्मणोग्निपर्यन्तम्॥नैर्ऋत्याद्वा
यव्यान्तम्॥ अग्नितः प्रणीतापर्यन्तम् ॥ ततोऽग्नेरुत्तरतःपश्चि
मदिशिपवित्रच्छेदनार्थंकुशत्रयं पवित्रकरणार्थंसाग्रमनंतर्गर्भं १०
कुशपत्रद्वयं प्रोक्षणीपात्रम्॥ आज्यस्थालीसंमार्जनार्थंकुशत्रय
म्॥ उपयमनार्थंवेणीरूपकुशत्रयं समिधस्तिस्रःस्रुवः आज्यंष

द्पंचाशदुत्तराचार्य्यमुष्टिशतद्वयावच्छिन्नातंडुलपूर्णपात्रं ततः
पवित्रच्छेदनकुशानांपूर्वपूर्वदिशिक्रमेणासादनीयानि ॥ ततःप
वित्रच्छेदनकुशैः पवित्रेच्छित्त्वासपवित्रकरेणप्रणीतोदकंत्रिःप्रो
क्षणीपात्रेनिधायअनामिकांगुष्ठाभ्यांसपवित्रेउत्तराग्रेगृहीत्वात्रि
रुत्पवनं प्रोक्षणीपात्रंवामकरेणादाय अनामिकांगुष्ठाभ्यांगृहीत
पत्राभ्यांतज्जलं किंचिन्निरुत्क्षिप्यप्रणीतोदकेनप्रोक्षणीमभिषि
च्य प्रोक्षणीजलेनासादितवस्तुसेचनंकृत्वाग्निप्रणीतयोर्मध्येप्रो
क्षणीपात्रंनिदध्यात् आज्यस्थाल्यामाज्यंनिरूप्याधिश्रयणम्।
ततः कुशंप्रज्वाल्योपरिप्रदक्षिणं भ्रामयित्वावह्नौतत्प्रक्षिप्यस्रुवं
त्रिःप्रताप्यसंमार्जनकुशानामग्रैरंतरतोमूलैर्बाह्यतः ॥ स्रुवंसंमृ
ज्यप्रणीतोदकेनाभ्युक्ष्यपुनस्त्रिःप्रताप्य दक्षिणतोनिदध्यात् ॥

 आज्यस्याग्नेरवतारणम् ॥ ततआज्यंप्रोक्षणीवदुत्पूयावेक्ष्यसत्य
 पद्रव्येतन्निरसनंकृत्वापुनः प्रोक्षणीस्रुत्पूयततउत्थायोपयमनकु
शान्वामहस्तेकृत्वा प्रजापतिंमनसाध्यात्वातूष्णीमग्नौघृताक्ताः
समिधस्तिस्रःक्षिपेत् ॥ उपविश्यसपवित्रप्रोक्षण्युदकेनप्रदक्षिण
क्रमेणाग्निंपर्युक्ष्यप्रणीतापात्रे पवित्रेनिधाय पातितदक्षिणजानुः
कुशेनब्रह्मणान्वारब्धः समिद्धतमेऽग्नौस्रुवेणाज्याहुतीर्जुहोति ॥
तत्तदाहुत्यनंतरम्॥स्रुवावस्थितघृतशेषस्यप्रोक्षणीपात्रेप्रक्षेपः॥
अथ स्रुवपूजनम् ॥ ॐ आवाहयाम्यहंदेवंस्रुवं शेवधिमुत्तमम् ॥
स्वाहाकारस्वधाकारवषट्कारसमन्वितम् ॥ अष्टांगुलंत्यजे
न्मूलमग्रेत्यक्त्वादशांगुलम् ॥ कर्त्तव्यंगोपदाकारं दंडस्याग्रेतु
कंकणम् ॥ विष्णोःस्थानंप्रगृह्णीयाद्धूयतेचहुताशनम्॥ पद्मयो

निंसमदायहोतासुखमवाप्नुयात् ॥ इतिस्रुवपूजनम् ॥ अथघृता
हुतिः ॥ ॐप्रजापतयेस्वाहाइदंप्रजापतयेनमम॥इतिमनसा ॥
ॐइंद्रायस्वाहा इदमिंद्राय॰इत्याघारौ ॥ ॐअग्नयेस्वाहाइदम
ग्नये॰॥ ॐसोमायस्वाहा इदंसोमाय॰इत्याज्यभागौ ॥ ॐभूः
स्वाहाइदंभूःॐभुवःस्वाहाइदंभुवःॐस्वःस्वाहाइदंस्वः॥एताम
हाव्याहृतयः।ॐत्वन्नोअग्नेवरुणस्यविद्वान्देवस्यहेडोअवयासि
सीष्ठाः॥यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्म
त्स्वाहा ॥ इदमग्नीवरुणाभ्यां॰ॐसत्वंनोअग्नेवमोभवोतीनेदि
ष्ठोअस्यउषसोव्युष्टौ॥ ॐवयक्ष्वनोवरुणꣳरराणोवीहिमृडीकꣳ
सुहवोनएधिस्वाहा॥इदमग्नये॰ ॥ ॐअयाश्चाग्नेस्यनभिशस्ति
पाश्चसत्वमित्वमयाअसि॥अयानोयज्ञंवहास्ययानोधेहिभेषज

ॅस्वाहाइदमग्नये० ॥ ॐयेतेशतंवरुणयेसहस्रंयज्ञियाःपाशा शां०
का० विततामहांतः ॥ तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतः
१२ स्वर्काःस्वाहा ॥ इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरु
द्भ्यःस्वर्केभ्यः ॥ ॐउदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमं
श्रथाय॥अथावयमादित्यव्रतेतवानागसोअदितयेस्यामस्वाहा
इदंवरुणाय०॥एताःसर्वप्रायश्चित्तसंज्ञकाः॥ॐगणपतयेस्वाहा
इदंगणपतये०॥ॐविष्णवेस्वाहाइदंविष्णवे०॥ ॐशंभवेस्वाहा
इदंशंभवे० ॐलक्ष्म्यैस्वाहाइदंलक्ष्म्यै०॥ॐसरस्वत्यैस्वाहाइदं
सरस्वत्यै०।ॐभूम्यैस्वाहाइदंभूम्यै०॥ॐसूर्यायस्वाहाइदंसूर्या १२
य०।ॐचंद्रमसेस्वाहाइदंचंद्रमसे०॥ ॐभौमायस्वाहाइदंभौमा
य। ॐबुधायस्वाहाइदंबुधाय०॥ ॐबृहस्पतयेस्वाहाइदंबृहस्पत

ये।ॐशुक्रायस्वाहाइदंशुक्राय०।ॐशनैश्चराय०इदंशनैश्चराय०
ॐराहवेस्वाहाइदंराहवे०।ॐकेतवेस्वाहाइदंकेतवे०॥ ॐव्युष्टचै
स्वाहाइदंव्युष्टचै० । ॐउग्रायस्वाहाइदमुग्राय० ॥ ॐशतक्रत
वेस्वाहाइदंशतक्रतवे०॥ॐप्रजापतयेस्वाहाइदंप्रजापत०। इति
मनसाप्राजापत्यम्॥ ॐप्रजापतयेस्वाहाइदंप्रजापतये०॥ॐअ
ग्नयेस्विष्टकृतेस्वाहाइदमग्नयेस्विष्टकृते०। इतिस्विष्टकृद्धोमः॥त
तःसंस्रवप्राशनम् ॥ आचमनंततोब्रह्मणेदक्षिणादानम्। ॐअद्य
एतस्मिन्शांतिहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थ
मिदंपूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणेब्राह्मणाय
ब्रह्मणेदक्षिणांदातुमहमुत्सृजे।ॐस्वस्तीतिप्रतिवचनम्।ततोब्रह्म
ग्रंथिविमोकः।ततःॐसुमित्रियानआपओषधयःसंतु॥ इतिपवि

ग्राभ्यांजलमानीयतेनशिरःसंमृज्य। ॐदुर्मित्रियास्तस्मैसंतुयो
स्मान्द्वेष्टियंचवयंद्विष्मः इत्यैशान्यांप्रणीतान्युब्जीकरणम् ॥
ततस्तरणक्रमेण बर्हिरुत्थाप्यघृतेनाभिघार्यहस्तेनैवजुहुयात्।
ॐदेवागातुविदोगातुंवित्वागातुमितमनसस्पतइमंदेवयज्ञꣳस्वा
हावातेधाःस्वाहा॥इतिबर्हिर्होमः ॥ ततआचारात्दशदिक्पाले
भ्योदधिमाषबलिर्देयःक्षेत्रपालबलिदानंचततःस्थालीपाकादि
पक्वान्नेनगणपतिप्रमुखसूर्यादिग्रहेभ्यस्तत्तन्मंत्रैर्बलिर्देयः। ततो
ब्राह्मणभोजनम्। अद्यतत्सत्कृतैतदमुककर्मनिमित्तकशांतिकर्म
सांगतासिद्ध्यर्थंयथोपस्थितेनपायसद्रव्येणयथापरिमितान्ब्रा १३
ह्मणानहंभोजयिष्ये॥ ॐअद्यकरिष्यमाणब्राह्मणभोजनसांगता
सिद्ध्यर्थमिदं दक्षिणाद्रव्यंतेभ्योविभज्यदातुमहमुत्सृजेततोगुर

वेदक्षिणादेया।ततःछायापात्रदानम्।तदनंतरंपूर्णाहुतिः।तद्यथा।
स्रुवेणपूगीफलादिकंगृहीत्वा ॥ ॐमूर्द्धानंदिवोअरतिंपृथिव्यावै
श्वानरमृतआजातमग्निम्॥कविꣳसम्राजमतिथिंजनानामासन्ना
पात्रंजनयंतदेवाः स्वाहा ॥ ततःस्रुवेणभस्मानीयदक्षिणानामि
काग्रगृहीतभस्मना॥ ॐत्र्यायुषंजमदग्नेरितिललाटे ॥ ॐकश्य
पस्यत्र्यायुषमितिग्रीवायाम् ॥ ॐयद्देवानांत्र्यायुषमितिदक्षिण
बाहुमूले॥ ॐतन्नोअस्तुत्र्यायुषमितिहृदि ॥ यजमानपक्षेतन्नोइ
त्यस्यस्थानेतत्तेइतिविशेषः॥ ततोभिषेकः ॥ तच्चाम्रपल्लवकुशा
दिकेन कलशस्थजलमानीय आपोहिष्ठेत्यादिमन्त्रेणयजमान
मभिषिंचेत्॥ आचार्यादीनांदक्षिणादेया॥ ततोभूयसींदद्यात्॥
ॐआज्येनवर्धतेबुद्धिराज्येनवर्द्धतेयशः ॥ आज्येनवर्द्धतेआयु

त्राभ्यांजलमानीयतेनशिरःसंमृज्य। ॐदुर्मित्रियास्तस्मैसंतुयो
स्मान्द्वेष्टियंचवयंद्विष्मः इत्यैशान्यांप्रणीतान्युब्जीकरणम् ॥
ततस्तरणक्रमेण बर्हिरुत्थाप्यघृतेनाभिघार्यहस्तेनैवजुहुयात्।
ॐदेवागातुविदोगातुंवित्वागातुमितमनसस्पतइमंदेवयज्ञᳫंस्वा
हावातेधाःस्वाहा॥इतिबर्हिर्होमः॥ ततआचारात्दशदिक्पाले
भ्योदधिमाषबलिर्देयःक्षेत्रपालबलिदानंचततःस्थालीपाकादि
पक्वान्नेनगणपतिप्रमुखसूर्यादिग्रहेभ्यस्तत्तन्मंत्रैर्बलिर्देयः। ततो
ब्राह्मणभोजनम्। अद्यतत्सत्कृतैतदमुककर्मनिमित्तकशांतिकर्म
सांगतासिद्ध्यर्थंयथोपस्थितेनपायसद्रव्येणयथापरिमितान्ब्रा १३
ह्मणानहंभोजयिष्ये॥ ॐअद्यकरिष्यमाणब्राह्मणभोजनसांगता
सिद्ध्यर्थमिदं दक्षिणाद्रव्यंतेभ्योविभज्यदातुमहमुत्सृजेततोगुर

वेद्क्षिणादेया।ततःछायापात्रदानम्।तदनंतरंपूर्णाहुतिः।तद्यथा।
स्रुवेणपूगीफलादिकंगृहीत्वा ॥ ॐमूर्द्धानंदिवोअरतिंपृथिव्यावै
श्वानरमृतआजातमग्निम्॥कविꣳसम्राजमतिथिंजनानामासन्ना
पात्रंजनयंतदेवाः स्वाहा ॥ ततःस्रुवेणभस्मानीयदक्षिणानामि
काग्रगृहीतभस्मना॥ ॐत्र्यायुषंजमदग्नेरितिललाटे ॥ ॐकश्य
पस्यत्र्यायुषमितिग्रीवायाम् ॥ ॐयद्देवानांत्र्यायुषमितिदक्षिण
बाहुमूले॥ ॐतन्नोअस्तुत्र्यायुषमितिहृदि ॥ यजमानपक्षेतन्नोइ
त्यस्यस्थानेतत्तेइतिविशेषः॥ ततोभिषेकः ॥ तच्चाम्रपल्लवकुशा
दिकेन कलशस्थजलमानीय आपोहिष्ठेत्यादिमन्त्रेणयजमान
मभिषिंचेत्॥ आचार्यादीनांदक्षिणादेया॥ ततोभूयसींदद्यात्॥
ॐआज्येनवर्धतेबुद्धिराज्येनवर्द्धतेयशः ॥ आज्येनवर्द्धतेआयु

दर्शनंपापनाशनम् ॥ अथविशेषपूजा ॥ ग्रहागावोनरेंद्राश्चब्रा
ह्मणाश्चविशेषतः॥ पूजिताःप्रतिपूज्यंतेसावधानाभवंतुते इति॥
अथाग्निविसर्जनम् ॥ गच्छगच्छसुरश्रेष्ठस्वस्थानंपरमेश्वर ॥
यत्रब्रह्मादयोदेवास्तत्रगच्छहुताशन ॥ आगतास्तुयथान्यायं
पूजितास्तुयथाविधि॥कृत्वाकृपांमयिदेवायत्रासंस्तत्रगच्छत॥
यजमानहितार्थायपुनरागमनायच ॥ शत्रूणांबुद्धिनाशायमि
त्राणामुदयायच ॥ यथाशस्त्रप्रहाराणांकवचंवारणंभवेत् ॥ तद्व
देवाभिघातानांशांतिर्भवतिवारणम् ॥ अथग्रहादीनांविसर्ज
नम्॥यांतुदेवगणाः सर्वेपूजामादायमामिकाम् ॥ इष्टकामहिता
र्थायपुनरागमनायच ॥ ॐ अग्निमीळेपुरोहितमित्यादिमंत्रेण
गणेशाद्यान्देवानुत्थापयेत् ॥ ॐ अग्निमीळेपुरोहितंयज्ञस्यदेव

मृत्विजम् ॥ होतारंरत्नधातमम् ॥ ॐविष्णुर्विष्णुर्विष्णुस्तत्स
दद्यामुकगोत्रोहममुकशर्माहमिदंसुमिष्टंघृतपक्कंविष्णुदैवतंभग
वद्विष्णुप्रीतयेयथानामगोत्रब्राह्मणायाहंददे ॥ ॐअद्यकृतैतत्सु
मिष्टघृतपक्कदानप्रतिष्ठासांगतासिद्ध्यर्थंविष्णुप्रीतयेयथानाम
गोत्रब्राह्मणायदक्षिणांदातुमहमुत्सृजे ॥ ॐ अद्यतत्सद्विवाहांग
त्वेनेदंमिष्टघृतपक्कंविष्णुदैवतंकुलदेवताप्रीतयेसौभाग्यप्राप्तयेय
थानामगोत्रब्राह्मणायाहंददे ॥ इति कन्यापक्षे ॥ ततःसुपूजितं
कंकणबंधनम् ॥ ततस्तिलकंकुर्यात् ॥ तदनंतरंसूर्यायार्घ्यदा
नम् ॥ इतिश्रीकात्यायनीयाग्रहशांतिःसमाप्ता ॥

ग्रहयज्ञ सामग्री.

गंध पुष्पउदक दूर्वा गुड कलश कुश कुंकुम धूप दीप तांबूल द्रव्य पंचरंग वस्त्र फल पान मृत्तिका चावल पंचपल्लव पंचगव्य रत्न ओषधी प्रतिमा मधु शर्करा यज्ञोपवीत सूत्र धान्य चरु माष बलि सर्षप आज्य समिधा इंधन शुष्कगोमयपिंड आसन पत्रावली द्रोण धमनी.